Digitized by Arya Samaj Foundation Chennai and eGangotri

भट्टसङ्कटम्

(प्रहसनम्)

लेखकः—श्रीश्रीजीवन्यायतीर्थः एम्. ए.

नान्दी

विडम्बयन्ती निबिड़ाम्बुवाहच्छन्नाम्बरं या विगताम्बरश्रीः ।
सौदामिनीदामसमानहास्या दास्यात् सदा सा विशदामृतं वः ॥

(नान्द्यन्ते) सूत्रधारः ।—अलमतिशयेन । एषोऽहमादिष्टोऽस्मि परिषन्मूर्द्धन्यैर्यदयमद्य सम्पाद्यतां सारस्वतोत्सवः केनाप्यभिनवप्रयोगाभिनयेनेति ।

यद् भट्टपल्ली भुवि रत्नवल्ली धत्ते श्रुताकैद्युति तर्करत्नम् ।
तत्सूनुना न्यूनधियापि वस्तु प्रणीतमेकं कुतुकान्नवीनम् ॥

तेन च कवियशःकामनामन्तरेण कोविदेभ्यो निवेद्यते,—

हास्याय विदुषामेतन्नाट्यं मे भट्टसङ्कटम् ।
दुष्टं वा सुष्ठु वा तुल्यमूल्यं प्रहसनोदये ॥

तद् यावद् विदूषकमाहूय प्रयोगमिमं निर्व्वर्त्तयामि ।

(नेपथ्याभिमुखमालोक्य) वयस्य, इतस्तावत् ।

विदूषकः ।(नेपथ्ये) —अब्बम्भसं अब्बम्भसं । (१)

---

(१) अत्रह्मण्यमब्रह्मण्यम् ।

५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्रधारः। अयि, वयस्यस्येवाक्रन्दः श्रूयते। वयस्य, वयस्य!

विदूषकः। (ससम्भ्रमं प्रविश्य)भाव परित्ताअदु, परित्तादु। (१)

सूत्र। (साशङ्कं) वयस्य, किमिवमाकुलीभूतोऽसि ?

विदू। भाव, स्सभावदो पीवरोदरभारमन्थरो पुणो बि अहं मन्थरीकिदो अज्ज गुरुभोअणदोसेण। एव्वं जाणिअ एआ पिसाची कोमलमंसलोलुवा मं अक्कमिदुं लहुं आअच्छदित्ति बलीअं भीदोऽह्मि। (२)

सूत्र। धिङ्मूढ़, ब्राह्मणस्य कुतः पिशाचीभयम् ? किं न जानासि—

यज्ञोयसूत्रं परमं पवित्रं प्रजापतेर्यत् सहजं तदेव।
पाति द्विजातीन् सपिशाचभूतप्रेतादिजेभ्यो नियतं भयेभ्यः॥

विदू। एव्वं सुदं आसी। दिट्ठं पुणो बिबरीदं। एसा सा दुट्ठपिसाची ब्बम्हणं ज्जेब बाधेदि। (३)

सूत्र। न तावदेवं कथमपि सम्भवति।

विदू। भोदु, जइ ण मे कधासु विस्सासो, ता क्खणं इदो पेक्खदु। (चणमवलोक्य) भाव, भाव, एसा सा पिसाची एक्कं ब्बम्हणं पच्चा आकस्सन्ती मां बि अक्कमिदुं इधज्जेब आअच्छदि। हा हदोह्मि! (४)

---

(१) परित्रायतां परित्रायताम्।

(२) भाव, स्वभावतः पीवरोदरमन्थरः पुनरपि अहं मन्थरीकृतोऽद्य गुरुभोजनदोषेण। एवं ज्ञात्वा एका पिशाची कोमलमांसलोलुपा माम् आक्रमितुं लघु आगच्छतीति बलवद् भीतोऽस्मि।

(३) एवं श्रुतमासीत्। दृष्टं पुनर्विपरीतम्। एषा सा दुष्टपिशाची ब्राह्मणमेव बाधते।

(४) भवतु, यदि न मे कथासु विश्वासः, तत् क्षणम् इतः प्रेक्षताम्। भाव, भाव, एषा सा पिशाची एकं ब्राह्मणं पश्चादाकर्षन्ती मामपि आक्रमितुम् इहैव आगच्छति। हा हतोऽस्मि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्र। (विलोक्य विहस्य च) वयस्य, किमेवमलीकभयेनाकुलोऽसि ?
न सा पिशाचो द्विजकामिनीयं नायञ्च भव्यो ननु वल्लभोऽस्याः।
तथापि तद्दम्पति-वाग्वितण्डा-चण्डानलस्याभिमुखे क आस्ताम्॥
तदेहि, गच्छाव:।

विदू। एव्वं विअ ? ता मन्दं मन्दं गच्छदु भवं। उदरं मे अधिअं बाधेति। (१)

(निष्क्रान्तौ)

इति प्रस्तावना।

प्रथमोऽङ्कः

(ततः प्रविशति दर्पणहस्ता कामिनी, पश्चाच्च कश्चिद् ब्राह्मणः।)

ब्राह्मणः। (स्वगतं) हन्त ! सेयं मे सहधर्मचारिणी।
पिशाचीभ्रान्तिं या जनयति घनध्वान्तसदृशी
दधाना सन्त्रासं निजजनगणानामपि भृशम्।
विरौति ध्वाङ्क्षीव क्षणमपि च वाचं न कुरुते
ययाक्रान्तो जीर्णालय इव भयस्थानमभवम्॥
तथापि कर्मानुरोधादियमनुनेतव्या।
(प्रकाशम्) अयि पूर्णेन्दुमुखि, तिष्ठ—

कामिनी। आः ! किमागच्छसि पुरतः ? यद्यागच्छेराच्छादय वदनम्। विभेमि प्रातरेवानिष्टदर्शनात्।

ब्राह्मणः। (स्वगतम्)
ब्रह्माण्डभाण्डनिर्म्मातुरहो घटनपाटवम्।
एतद्रूपमिदं शीलं येनैकत्र कृतं भुवि॥

---

(१) एवमिव। तत् मन्दं मन्दं गच्छतु भवान्। उदरं मे अधिकं बाधते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(प्रकाशम्). अयि,

सर्पसि दर्पणहस्ता प्रेयसि निजनेत्रतर्पणायेव।
पतति सुधानिधिवदने जल इव मयि किं न ते बिम्बः॥

कामिनी। अरे,

आविलपङ्किलमूर्त्ते मत्सरतामत्स्यमथ्यमानान्तः।
वक्ष्यसि कथमिह वचसि मादृशविधुबिम्बसम्पर्कम्॥

(दर्पणसम्मुखे केशप्रसाधनं नाटयति)

ब्राह्मणः। (स्वगतम्) अहो ममैव दैवविपाकेन,—

सुनीलवर्णपर्णेयं कटुभाषारसान्विता।
दुःशीलकण्टकाकीर्णा द्रुमं वल्लीव मां श्रिता॥

भवतु, परिहासेनास्याः सन्तोषमादधामि।

(पश्चादागत्य दर्पणे स्वमुखप्रतिबिम्बं पातयति)

कामिनी। (दर्पणमध्ये पतिमुखमालोक्य सक्रोधम्) अत्याहितम्, अत्याहितम्, भर्त्तृपदव्यपदेशिनो रौरवस्य प्रातरेव मुखदर्शनं करोमि। न जाने मरणव्याधिशोकानामद्य कस्य विधेयतां गमिष्यामि।

भृत्यः। (नेपथ्ये) हा हदोह्मि, मुसिदोह्मि, भक्खिदोह्मि। (१)

कामिनी। यच्चिन्तितं तदेवापतितम्। अहो मुखमहिमा!

भृत्यः। (प्रविश्य) हा हदोह्मि, मुसिदोह्मि, भक्खिदोह्मि। (१)

कामिनी। अहो मुखमहिमा! दृष्टमात्रे यस्मिन् वराकोऽयं भृत्यो नितरां व्याकुलीभूतः। वत्स, कथय किं वृत्तम्?

ब्राह्मणः। किमिदमापन्नम्? अरे दासीपुत्र कापटिक भृत्याधम, किमेवं प्रातरेव रासभवद् विक्रोशसि? अथवा,

गर्जति लघुरपि मेघः कर्णज्वरं जनयन् जनानां यत्।
तत्र न संशयलेशः क्वाचन चपलाक्रियास्त्येव॥

(१) हा हतोऽस्मि, मोषितोऽस्मि, भक्षितोऽस्मि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामिनी। अलमेतद्लीकवचनश्रवणेन। वत्स, कथय स्वकीयं वृत्तम् ?

भृत्यः। (वेपमानः) अज्जा किं कधेमि, ण अहं जीविदो, ण मे बाआ णिस्सरन्दि। (१)

कामिनी। अहो दुर्दैवम्! दुर्मनुष्यमुखदर्शनेन प्रियतमो मे भृत्यो सद्यो म्रियते। यावद्दासीं मन्थरामाह्वयामि। (निष्क्रान्ता)

ब्राह्मणः। अरे कपटपटो दासीपुत्र, तिष्ठ वेत्रदण्डेनानेन ते पुनः प्राणान् सञ्चारयामि। (वेत्रमादाय प्रहर्त्तुमुद्यतः)

भृत्यः। अज्ज सच्चं ज्जेव मे प्पाणा बहिग्गदा। प्पच्चूसे दुवे रक्खसा मम सअनघरे दिट्ठा। ताणं विअटमुत्तिदंसणेण किं अज्जवि इमस्सिं पेलवे सलीले प्पाणा प्फुरन्दि ? ता रक्खदु मं सलणागदं देओ। (२) (पादयोः पतति)

ब्राह्मणः। (स्वगतम्) सत्यमेव भृशं भीतोऽयं भृत्यः। (प्रकाशम्) मूर्ख, दुःस्वप्न एवैष ते ?

भृत्यः। अज्ज ण सिविणओ णावि व्भमो। एदेहिं ज्जेव लोअणेहिं णिण्णिद्देण मए परिप्फुड़ं विलोइदा दुवे रक्खसा। ता रक्खदु मं अज्जो। (३)

ब्राह्मणः। किं नाम मदीये गेहे रक्षसां सञ्चारः ?

भृत्यः। अध इं। (४)

ब्राह्मणः। योऽहं

---

(१) आर्य्यौ किं कथयामि, नाहं जीवितः न मे वाचा निःसरन्ति।

(२) आर्य्य, सत्यमेव मे प्राणा वहिर्गताः। प्रत्यूषसि द्वौ राक्षसौ मम शयनगृहे दृष्टौ। तयोर्विकटमूर्त्तिदर्शनेन किमद्यापि अस्मिन् पेलवे शरीरे प्राणाः स्फुरन्ति ? तद्रक्षतु मां शरणागतं देवः।

(३) आर्य्य, न स्वप्नो नापि भ्रमः। एताभ्यामेव लोचनाभ्यां निर्निद्रेण मया परिस्फुटं विलोकितौ द्वौ राक्षसौ। तद्रक्षतु मामार्य्यः।

(४) अथ किम् ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उच्चाटनेन विकटाकृतियातुधानान्
निर्जित्य यज्ञनिकरान् कृतवानवन्ध्यान् ।
कस्तस्य राक्षसरणोत्करघस्मरस्य
विप्राशनेर्विशति वासगृहं गतायुः ॥

गणदास, दत्ताभयोऽसि, जीवितं लभस्व मम प्रसादात् ।

भृत्यः । अम्महे, पच्चुज्जीविदोह्मि भट्टादेसदो, जाव अज्जाए णिवेदेमि । (२) (निष्क्रान्तः)

ब्राह्मणः । अहमपि स्वल्पेनैव कालेन

रक्षां विधाय विधिबोधितबन्धनेन
रक्षोगणागमपथं विनिवारयामि ।
यज्ञांस्तनोमि च निशाचरनाशयोग्यान्
प्राप्तः क्वचित् परिभवं न हि सावधानः ॥

(सावशेषम्)

---

(२) अहो प्रत्युज्जीवितोऽस्मि भट्टादेशात्, यावदार्य्यायै निवेदयामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भट्टसङ्कटम्

प्रहसनम्

(पूर्व्वतोऽनुवृत्तम्)

लेखकः—श्रीश्रीजीवन्यायतीर्थः एम्. ए.

(प्रविश्य) भृत्यः। अज्ज पाविदो। (१)

ब्राह्मणः। अये कः ?

भृत्यः। भअदो एओ यजमाणओ। (२)

ब्राह्मणः। अविलम्बं प्रवेशय तम्।

भृत्यः। जधा आणवेदि देओ। (३)

(निष्क्रान्तो यजमानेन सह पुनः प्रविश्य) एष भअदो भट्टा चिट्ठदि, ता उवसप्पदु भवं। (४)

यजमानः। भट्ट, भवन्तमभिवादये।

ब्राह्मणः। स्वस्त्यस्तु ते।

यजमानः। भट्ट, कुतः स्वस्ति ?

(१) आर्य्य प्राप्तः। (२) भवतः एको यजमानः। (३) यथाज्ञापयति देवः।
(४) एष भवती भट्टस्तिष्ठति, तदुपसर्पतु भवान्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आरभ्यमानसवने भवने मदीये यातौ हठाद् विकटदर्शनयातुधानौ।
दृष्ट्वा च यौ परिजनाः परिपक्वशस्ये मेघोदयादिव विपत्पतनं स्मरन्ति॥

पूर्व्वमेव वृतो यज्ञे यस्मिन् देव भवान् मया।
वार्य्यन्तां राक्षसास्त्वद्य तद्यज्ञप्रतिबन्धकाः॥

गृह्यतामयं च पाथेयदीनारः।

ब्राह्मणः। (स्वगतम्) अहो गणदासवचनमवितथमेव सम्पद्यते। (प्रतिगृह्य) गच्छ त्वमहमप्यनुपदमेव गच्छामि।

यजमानः। कृतार्थोऽस्मि। (निष्क्रान्तः)

ब्राह्मणः। अरे रे कटुकषायभाषाविलासिनि कुटुम्बिनि! पश्य मन्मुखदर्शनस्य सद्यः परिणामम्।

(मन्थरया सह प्रविश्य) कामिनी। दुर्ज्जन! यदि त्वदीयवदनविलोकनपुण्यस्य परिणामोऽयं, किं न लज्जते ते हस्तस्तमिमं ग्रहीतुम्?

ब्राह्मणः। कथमिव?

कामिनी। कथमिव? त्वदीयसुखमोच्चितं मयैव मन्दभाग्यया, दीनारलाभाय तु त्वया प्रसारितो हस्तः। अहो विवेकः।

कृतं कर्म्म मया धर्म्यं पुण्यमाप्तं त्वया पुनः।
एकस्य गण्डे कण्डूतिः परस्याण्डे नखाङ्कनम्॥

ब्राह्मणः। प्रिये, सत्यं पराभूतोऽस्मि। तदिमं त्वमेव गृहाण।

कामिनी। गृह्णामि नैतत् स्वयमर्थितं यन्नाहं तथा भैक्ष्यमुरीकरोमि।
वृणोत्यरण्ये वरमात्मनाशं न माननाशं सहते कुलीना॥
(इति प्रस्थिता)

ब्राह्मणः। अरे मन्थरे!

मन्थरा। (उपसृत्य) अज्ज किं मम ज्जेव दीअदि? (१)

---

(१) आर्य्य किं मह्यं दीयते?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(दीनारं ग्रहीतुं हस्तं प्रसारयति)

ब्राह्मणः। (स्वगतम्) अहो स्पर्द्धा ! (प्रकाशम्) गणदास।

भृत्यः। णिक्कम रे मन्थरे ! अज्ज किं मं ज्जेव अणुगेह्णासि। (२)

(हस्तं प्रसारयति)

(कामिनी सम्मार्ज्जनीमादाय सहसा प्रविश्य)

कामिनी। मासपक्षतिथीनाञ्च स्मरणाय विशेषतः।
दातुः प्रतिग्रहीतुश्च संस्कारः क्रियते मया॥

(इत्युपसर्पति)

ब्राह्मणः। (सभयम्) गणदास, सत्वरमेहि मया सह यजमानगृहप्रस्थानाय। तदर्थमेवाहूतोऽसि। मन्थरे, त्वमप्याहूता प्रवासयात्रासम्भारसज्जायै। यावदहं प्रातःशौचं सम्पादयामि।
(निष्क्रान्तः)

कामिनी। असंस्कृत एव दाता पलायितः। अरे विस्मृतयमद्वारे मन्थरे, दासीपुत्र गणदास, तिष्ठतं युवाम्।

सुवर्णलाभाय ततौ न हस्तौ वृथा भवेतां मयि जीवितायाम्।
सम्मार्जनी वः कुरुतेऽचिरेण सुवर्णशोभां रुधिरोद्गमेन॥

भृत्यः। (धावन्) हा रक्खसा कधं ण मं तदाणीं ज्जेव मारेध मरामि णररक्खसीहत्ते। (निष्क्रान्तः)

मन्थरा। हा जामादह ! तुह स्सस्सु मरदि अङ्गीकरिअ पिशाचीदास्सं। (निष्क्रान्ता)

कामिनी। अहो स्पर्द्धा भृत्यानाम्। अधिक्षिपति मामपि। अद्य तु सर्व्वानेव गृहादस्माद् दूरीकरोमि। (निष्क्रान्ता)

प्रथमोऽङ्कः

---

(२) निष्क्रम रे मन्थरे ! आर्य्य, किं मामेवानुगृह्णासि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयोऽङ्कः

(प्रविशति कामिनी)

कामिनी। अपहृतानां गणः सर्व्व एव दूरीभूतः। अहो स्वाच्छन्द्यम्! (परिक्रम्य सामर्षम्) म्रियस्व म्रियस्व म्रियस्व, शङ्खाभरणमुन्मोचयामि, सिन्दूरं मुञ्चामि, वैधव्यमुरीकरोमि। प्रतिपदमवजानासि मां, प्रतिपदमवमन्यसे मदीयं कर्म्म, प्रतिपदं गर्हसि मे रूपम्। किमहं सत्यमेव कुरूपा? न ददासि शोभनमाच्छादनं नापि महार्हाण्याभरणानि, कथमहं प्रियदर्शना स्याम्।

नक्षत्रपुञ्जैरनुरञ्जितेयं न शोभते किं वितमा तमिस्रा।
श्यामा लताप्युज्ज्वलपुष्पभूषा हरत्यलं न भ्रमरस्य चेतः॥

अपिच

सौन्दर्य्यस्य निदानं हि केशभ्रूनयनं प्रियम्।
वेधा विधाय सुश्यामं श्यामरूपे जयं दधौ॥

नूनं स महापातकी यो न बहुमनुते श्यामरूपमङ्गनानाम्। अथवा कृतं चिन्तनेन। घोरेयं यामिनी। यावत् स्वपिमि।

(निद्रां नाटयति)

(सहसा नभोदेशात् पततो द्वौ राक्षसौ विरोधवलाकनामानौ)

विरोधः। वलाक!

वलाकः। विरोध!

विरोधः। अपि जीवसि?

वलाकः। कथमपि; त्वं जीवसि?

विरोधः। अहमपि तथा। अहो दासीपुत्रस्य ब्राह्मणाधमस्य मन्त्राः शरनिकरा इव शरीरान्तःप्रविष्टाः।

वलाकः। विरोध, यज्ञस्थलं गत्वा यावदेव घृतभाण्डं फलतण्डुल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताम्बूलादिकमाकृष्टं तिरस्करिणीच्छन्नदेहेन मया, तावदेवं तेन विप्रकुलकलङ्केन रक्षामन्त्रपाठपूर्व्वकमुच्चाटनमारब्धं येनावां प्रबलानिलताड़ितस्तूलराशिरिव योजनान्तरे निक्षिप्तौ ।

जातो वंशे भुवनविदिते रक्षसां यः प्रशस्ते
वीर्य्योत्सेकात् कति न मनुजान् हन्तुमेकोऽपि शक्तः ।
सोऽहं क्षुद्रद्विजमुखमनूच्चारणान्नष्टशक्ति-
र्लज्जे वक्तुं तदनु धरणौ जीवितुं दग्धमात्रम् ॥

विरोधः । बलाक, किमेवमवसीदसि ? धीर इव प्रतीकारमाचर । ब्राह्मणस्य भार्य्यामपहर । तस्य भार्य्यापहरणमेव साम्प्रतमेकः प्रतीकारोपायः । तत्फलञ्च ब्राह्मणस्य दौर्म्मनस्यं तथा स्त्रीविरहेण यज्ञकर्म्मण्यनधिकारः ।

बलाकः । क्रियते, यथैव ते रोचते । भ्रातः क्व पुनरापतितौ स्वः ।

विरोधः । निरूप्यताम् ।

बलाकः । अहो भाग्यात्तस्यैव ब्राह्मणस्य गृहे समायातौ । भ्रातर्विरोध, किं नोपलभ्यन्ते तद्दिनदृष्टानि प्रत्यभिज्ञानानि ।

विरोधः । सम्यगुपलभ्यन्ते । अयि भ्रातः, यदि नाम विप्रपत्नी प्रियदर्शना स्यात् ।

बलाकः । तदा अहो सौभाग्यम् ! भवतु अभ्यन्तरं प्रविश । यावदन्वेषयामि ताम् ।

(इति गृहाभ्यन्तरप्रवेशं नाटयति)

बलाकः । (सभयमपसृत्य) भ्रातर्विरोध ! पिशाचस्य गृहमेतत् । दृश्यतां पिशाची काचित् स्वपिति ।

विरोधः । अहो सत्यं ! भ्रान्तिवशात् कस्य गृहमागतौ स्वः । भवतु पश्यामि । (इतस्ततो निरीक्षते)

कामिनी । (उत्स्वप्नायते) मन्थरे त्वमेव तस्य यज्वनो ब्राह्मणस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्म्मसहायी भव। वरमहमरण्ये पर्व्वते वा गच्छामि न पुनस्तादृशब्राह्मणस्य पार्श्ववर्त्तिनी भवामि।

बलाकः। (दूरादनुभूय) विरोध, दिष्ट्या वर्द्धसे। जयति भगवान् शुक्राचार्य्यः। इयमसौ स्वप्ने स्वप्रवृत्तिमुद्घाट्य तिरयति नः सन्देहम्। तदलं विलम्बेन यावदेनां नयाव आवाम्।

विरोधः। बलाक! भीतोऽस्मि रूपसम्पदस्तस्याः। यदि नाम राक्षसानेव सा भक्षयेत्।

बलाकः। मा भैषीः। नयाम्येनां विजनं वनमुत्पलावतम्। यत्र राक्षसोऽपि प्रायो नायाति, पशुरपि भीतभीतश्चलति।

विरोधः। (उपसृत्य किञ्चिन्निर्व्वर्ण्य पुनरपसरति)

बलाकः। (आघ्राय) भ्रातर्मानुषीयमिति नास्ति सन्देहः। तद् दृढं बधान।

विरोधः। क्षणमपेक्षस्व, यावत् सम्मोहिनीं मायां विरचय्य बध्नामि। (तथा कृत्वा)

उभौ। जयति भगवान् शुक्राचार्य्यः। (निष्क्रान्तौ)

(अवशिष्यते)

इति द्वितीयोऽङ्कः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भट्टसङ्कटम्

प्रहसनम्

(पूर्व्वतोऽनुवृत्तम्)

निबन्धकः—श्रीश्रीजीवन्यायतीर्थः एम्. ए.

तृतीयोऽङ्कः

ततः प्रविशति राजा, विदूषकः, कञ्चुकी ब्राह्मणश्च ।

राजा । ब्रह्मन् ! श्रुतवृत्तान्तोऽस्मि । किन्त्वविदितगतिस्थितिवृत्तीनां भवतो दाराणां कथमुद्धारः सम्भाव्यते ?

न वेद्मि केनापहृता क्व वा नीता तु सा द्विज ।
यतेऽहं विग्रहे कस्य कुतो वाप्यानयामि ताम् ॥

तदादिशतु भवानेव किमत्र शक्यते मया प्रतिविधातुम् ।

विदूषकः । भो ब्राह्मण ! खुराङ्कनगोमयविकरणदर्शनेन यथा मे चौरिणी कां दिशं गतेति सम्यगुपलब्धं किं तथैव नावगन्तुं शक्यते ?

ब्राह्मणः । भार्या श्रीरिव या स्थिता मम सदा यज्ञाधिकारप्रदा
भूम्याकाशरसातलेषु यदि वा नीतापि सा मृत्युना ।
सम्राजि त्वयि शासति क्षितिमिमां तत्त्वं न चेल्लभ्यते
व्यर्थं लोकशुभाशुभप्रतिभुवं ब्रुते भवन्तं जनः ॥

राजा । ब्रह्मन् ! मा कुप्य ।

अविज्ञातनिदानस्य रोगस्य हि चिकित्सितम् ।
अपि धन्वन्तरेर्व्यर्थं तेन किं मम दूषणम् ? ॥

तथापि यद्यपराधो न गृह्यते तदा किञ्चिदन्यत् प्रस्तौमि ।

ब्राह्मणः । उच्यतां महाराजेन ।

राजा । किं न शक्यते भवता यज्ञाय दारान्तरं ग्रहीतुम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदूषकः । अपिपासुं शिशुं माता बलात् क्षीराणि पाययेत् ।
न पश्येन्निःसरल्लालं विड़ालं नेत्रकोणतः ॥

एतदेव मे दुःखाय, यन्नियतानुषङ्गो महाराजस्य वयस्योऽयं कदापि न तादृग् वागमृतेन सन्तर्पितः ।

राजा । वयस्य ! नायं परिहासकालः । नूनमेव ब्राह्मणोऽयं रूपगुणसम्पन्नाया भार्य्यायाः साम्प्रतं विरहमनुभवन् नितरां दौर्म्मनस्यमाप्तः । तत् कथान्तरं परिहाय कथञ्चिच्चित्तप्रसादनमनुसन्धाननिदानञ्च तस्या रूपगुणालोचनं समीचीनमधुना । तदुच्यतां ब्रह्मन् भवतो भार्य्यास्वरूपम् ?

ब्राह्मणः । देव ! किं कथयामि,—

वर्णं कोकिलतः स्वरं च खरतो नम्रात्मतां व्याघ्रतः
पत्यौ वृत्तमहो शृगालसरमापत्यैकदाम्पत्यतः ।
कायं वानरतो धियञ्च गजतः संगृह्य गूढं विधि-
र्ध्यानाधीनमना मदीयदयितां विश्वेऽद्वयां निर्ममे ॥

विदूषकः । तर्हि तिलोत्तमेति वक्तव्यम् ।

राजा । किं परिहससि ब्राह्मण !

ब्राह्मणः । राजन् नाहं परिहसामि । सत्यमेव—

कठोरनेत्रा सात्युच्चा ह्रस्वबाहुः कृशानना ।
विरूपरूपा भूपाल न निन्दामि तथापि ताम् ॥
वाचि भूपातिपरुषा न सौम्या न च शीलतः ।
मनागतीतं तस्याश्च भूपाल प्रथमं वयः ॥

विदूषकः । महाराज ! भवताप्यलब्धं निदानं मया लब्धम् ।

ब्राह्मणः । (साग्रहं) कथमिव ?

विदूषकः । एवं महाभूतसमाधिना विनिर्म्मितं स्त्रीरत्नं धरणीतले संप्रेष्य विधाता चिरं निर्निद्रो बभूव । साम्प्रतमनुभूतनिद्राप्रयोजनस्तद्रत्नं प्रतिसञ्जहार ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजा। साधु सम्भाव्यते वयस्येन। ब्रह्मन्! दारान्तरग्रहणमेव कर्त्तव्यमिति निश्चीयताम्।

ब्राह्मणः। महाराज! पुनरपि तथैव भाषसे,

या धर्म्मपत्नी मम कर्म्मलब्धा रूपेण वासौ रहिता गुणेन।
अनादरस्तत्र तु पातकाय सनातनो भारतरीतिरेषा॥

अपि च—रक्ष्या भार्य्या महीपाल इति नः श्रुतिरुत्तमा।
भार्य्यायां रक्ष्यमाणायां प्रजा भवति रक्षिता॥

तत्तस्या एव भार्य्यायाः समुद्धारं भवन्तं प्रार्थये।

राजा। (सचिन्तं स्थितः)।

विदूषकः। भो ब्राह्मण! यज्ञार्थं तादृशगृहिण्यास्ते हिरण्मयीं प्रतिकृतिं घटयिष्यति महाराजः।

(नेपथ्ये कलकलः)

ततः प्रविशति ब्राह्मणकुमारैराकृष्यमाणः कश्चित् पुरुषः।

पुरुषः। जयति तारा।

विप्रकुमाराः। जयति जयति देवः।

राजा। किमिदं व्यवसितं द्विजकुमारैः।

प्रथमः कुमारः। देव! पुरुषोऽयं सर्वज्ञ इति स्वयमात्मानं प्रकाशयितुमिच्छति। यतो मदीयनाममात्रं पृष्टः स किल मदीयपितृपितामहपितृव्यादीनामपि पूर्वाभ्यस्तां कुलपञ्जीं पठति। तदर्थमेव भण्डोऽयं दण्डनीय इति भवत्समीपमागताः स्मः।

राजा। शृणुमस्तावत्, ततस्ततः।

द्वितीयः कुमारः। न केवलमेतावत्। मदीयकरतलमध्यस्थं वदति मालूरपत्रमिति दुर्बोधभाषया किञ्चिदभिधाय तूष्णीमास्ते। तदयं दण्डनीयो न वेति भवन्त एव प्रमाणम्।

पुरुषः। (भयं नाटयन्) जयति तारा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मण:। (साग्रहं) शिशो न जानासि मालूरपत्रम्? मालूरपत्रं बिल्वपत्रञ्चैकमेवार्थं बोधयति। उन्मोचय करमुष्टिं पश्यामि।

द्वितीय: कुमार:। (सलज्जं) भवानेव जानाति। (इति मुष्टिमुन्मोच्य दर्शयति)

(राजा ब्राह्मणश्च विस्मयं नाटयत:)

तृतीय: कुमार:। नास्ति विस्मयकारणं किञ्चिदपि। देव, काकतालीयन्यायेन कथितमनेन मालूरपत्रमिति। मम तु करतले स्थितं वस्तु हस्तीति हस्तिमूर्खोऽयं कथयति, तस्यायं श्लोक:।—

प्राणी कश्चित् कृष्णवर्णश्चतुष्पात्
एक: शुण्डस्तस्य तुण्डप्रलम्बो।
वन्योऽप्येषोऽन्तेचरो मानवानां
मन्ये नान्यो विद्यते कोऽपि हस्ती॥

तदयं भण्ड: सर्वथा गुरुदण्डमर्हतीति विचार्यतां देवेन।

पुरुष:। (सभयं) जयति तारा।

ब्राह्मण:। शिशो, हस्तीति शब्दमात्रे भ्रमो दृश्यते। श्लोकस्य पादत्रयं श्रुत्वा मया तु मशक इत्यनुमीयते। कुमार! मुष्टिरुन्मोच्यताम्।

तृतीय: कुमार:। द्विजवर! भवानेव यथार्थवादी, नायं भिक्षुक:।

(इति मुष्टिमुन्मोच्य मशकं दर्शयति)

(राजा ब्राह्मणश्च परस्परं मुखमीक्षेते)

राजा। (पुरुषं प्रति) प्रणमामि भवन्तम्। इदमासनमास्तीर्णमुपविश्यतामार्य्य:। द्विजकुमारा: कृतागसो भवन्त:, प्रसादयत महापुरुषं विनयाचारेण।

(कुमारा: प्रणम्य द्रुतं निष्क्रान्ता:)

पुरुष:। स्वस्त्यस्तु। जयति तारा। (उपविशति)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजा। भगवदनुग्रहमिव मूर्त्तं, सविग्रहमिव ममैव पुण्यपरिपाकं भवन्तमासाद्य परमानन्दसन्दोहमागतोऽस्मि। अस्ति मे कश्चित् प्रश्नः।

पुरुषः। जयति तारा। कः प्रश्नः ?

राजा। महापुरुष ! अस्य खलु यज्वनो ब्राह्मणस्य प्रवसतो गृहस्थिता सहधर्मचारिणी विनष्टा। न तस्याः काचित् प्रवृत्तिरासाद्यते। तस्माद् ब्राह्मणोऽयं परं विषादमुपगतः। किं तस्या वृत्तमिति भवन्तं पृच्छामि।

पुरुषः। (चक्षुषी निमील्य) जयति तारा।

सीतारामासोमसन्निप्रयोगो यद्विश्लेषाक्षोमसंघोषत्वमेति।
तद्वर्णाभां चिज्जड़ाद्वैतभावां वन्दे तारां तां त्रिलोकैकसाराम्॥

(क्षणं ध्यायन्) श्रूयताम्।

असिता विकृताकारा ब्राह्मणी नाम कामिनी।
वसत्यक्षतचारित्रा सोत्पलावतकानने॥
तां जहार विरोधस्य बलाकस्यापि राक्षसः।
गच्छ संयोजयाशु त्वं भार्य्यया हि द्विजोत्तमम्॥

ब्राह्मणः। अहो सर्वं प्रत्यक्षमिव पश्यति महापुरुषः। (स्वगतं) अक्षतचारित्रेति मे हृद्गतमपि प्रश्नान्तरमुद्घाटितमनेन साधुना।

राजा। एतद्वचनाकर्णनेन निष्प्रतीघातमिव पन्थानमहमालोकयामि। महाजन, किं ते प्रत्युपकरोमि ? कञ्चुकिन्, श्रूयताम्। (कर्णे एवमेवम्)

कञ्चुकी। यथाज्ञापयति देवः। (निष्क्रान्तः)

(पुनः प्रविश्य मुद्राराशिसमेतं रौप्यभाजनं राजहस्ते समर्पयति)

राजा। (गृहीत्वा) महापुरुष ! अकिञ्चनमिदं भवादृशजनायोग्यमपि मदनुग्रहाय गृह्यतां मुद्रापात्रम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषः । मुद्रा, मुद्रा, मुद्रा, दीयतां । (गृहीत्वा) महान्तं सन्तोष-माखादितोऽस्मि ।

(पुरुषः परिक्रामति)

पुरुषः । मुद्रा हि नाम पञ्चमकारसाधनोपकरणमेकम् । सुदृश्या एता मुद्राः । यावदेकामाखादयामि । (इति मुखमध्ये मुद्रां निक्षिपति चर्व्वणं नाटयन् क्लेशमनुभूय मुखान्निःसार्य्य) अहो वञ्चितोऽस्मि राज्ञापि । अखाद्यकोयं मुद्रा । तद्दूरी-भवतु (इति मुद्रापात्रं बलान्निक्षिपति मुद्राशब्दं श्रुत्वा) अहो कर्णपटहविदारी कठोरशब्दः ! यावद् द्रुतं धावामि । (कर्णौ पिधाय धावति)

इति निष्क्रान्ताः सर्व्वे ।

इति तृतीयोऽङ्कः　　(अवशिष्यते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भट्टसङ्कटम्

प्रहसनम्

(पूर्व्वतोऽनुवृत्तम्)

निबन्धकः—श्रीश्रीजीवन्यायतीर्थः एम्. ए.

चतुर्थोऽङ्कः

उत्पलावतकाननप्रान्तभूमिः ।

(ततः प्रविशन्ति विरोधो बलाको राक्षसयोषितश्च)

विरोधः । हाः ! हाः !! हाः !!! अहो प्रभावोऽस्माकम् ।

बलाकः । हाः ! हाः !! हाः !!! अहो पराभवो ब्राह्मणस्य ! यदधुना वयं यज्ञीयद्रव्याण्यपहरामः सर्व्वत्रैव निर्व्बाधम् ।

विरोधः । (आकाशे) भो ब्राह्मण, क्व ते मन्त्रगर्व्वः ? क्व वा यज्ञेषु प्रभावः ? सैषा ते कालिनी नीलवर्णा विजयपताकेवास्माकं कान्तारमध्ये निहिता तिष्ठति । अहो कौशलमाविष्कृतमस्माभिः ।

बलाकः । विरोध, सत्वरमेहि यज्ञान्तरभङ्गाय । क्षुधा मां बाधते ।

विरोधः । प्रियसख्यः, ऋतुलीला महोत्सवसङ्गीतमारभ्यताम् । यावद् वयमपि स्वकर्म्मसम्पादनाय प्रयतामहे । एहि, बलाक ।

(इति निष्क्रान्तौ विरोधबलाकौ ।)

(सर्व्वा एकैकशो गायन्ति)

सुधन्या । अहं वसन्तः

अधन्या । शरदस्मि चाहम्

विरोधिनी । ग्रीष्मोऽह—

बलाकिनी । मस्म्येव पयोदकालः ।

अलसा । हेमन्तनामाह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवशाः। महच्च शीतः।

सर्व्वाः। का तावदस्मासु दिवाकरः स्यात् ॥

राक्षस. कश्चित्। (प्रविश्य) कामिनी नाम ब्राह्मणी। अथवा साम्प्रतमहमेव दिवाकरोऽस्मि।

(इति सर्व्वा मण्डलाकारेण तं वेष्टयन्ति, गायन्ति नृत्यन्ति च)

शरदि वसन्ते पुष्पविकाशा ग्रीष्मे विरहजतापविलासाः।
प्रावृषि नयनजवारिविधानं हेमन्ते नवहर्षनिधानम् ॥
शीते जड़तागुरुगुरुभाव ऋतुरमणेऽस्मिन् कः खलु लाभः।
कृत्वा भावविशेषितवेशान् मनसि लभेमहि हर्षविशेषान् ॥

विरोधिनी। विरम्यतां सख्यः। मानुषीसुरभितेऽस्मिन् देशे न शोभते ऋतुलीलोत्सवस्य चिरानुष्ठानम्। यद्देनं न जानन्ति मानुष्यः। सुष्ठु शोभते साम्प्रतं मानुषी क्रीड़ा, या विरह-विधुरामपि कामिनीं विनोदयिष्यति।

अपराः। न जानीमस्तादृशीं क्रीड़ाम्।

विरोधिनी। तिष्ठत, दर्शयामि। (राक्षसं प्रति) वेङ्कट, गच्छ त्वं, कथय च कामिनीमत्रागन्तुम्।

राक्षसः। यथाह भवती। (सानन्दं धावन् निष्क्रान्तः)

विरोधिनी। सुधन्ये, त्वामेवादौ मानुषक्रीड़ायां नियोजयामि। आगच्छ, मानुषीवेशं ते विरचयामि।

(सुधन्या पुरः प्रसरति, विरोधिनी तन्मुखे मसीं लेपयति। अपराश्च विहस्य पलायन्ते)

सुधन्या। (कपोलयोः करस्पर्शेन मसीलेपमनुभूय) अहो क्लेशदः परिहासः! सत्यं त्वं विरोधिनी। यन्मे पलाण्डुपाण्डुरौ गण्डौ मलिनयसि मसीलेपनेन। (विरोधिन्या वस्त्रमाकृष्य कपोलौ प्रोञ्छितुमीहते)

विरोधिनी। (किञ्चिदपसृत्य) मा तावदकाण्डे परिक्रियता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मस्माकं क्रीड़ा। सुधन्ये, सत्यमेव त्वयि मानुषोऽभ्रमो जायते। यदि न विश्वासो मद्वचसि, दृश्यतामियमागच्छति कामिनी, तया सह संवादय ते साम्प्रतिकं रूपम्।

सुधन्या। तिष्ठ, सर्व्वं कथयामि कामिनीम्। (उच्चैः) सखि कामिनि, इत इतः।

(कामिनीमागच्छन्तीं विलोक्य विरोधिनी निष्क्रान्ता)

कामिनी। (प्रविश्य) अरे सुधन्ये, किं ते मुखे दृश्यते? अहो कलङ्ककालिमा, किं विधिना दत्तः? मादृशजनापहरणापराधं चिराय न मर्षयिष्यति वेधाः। सुष्ठु शोभसे।

सुधन्या। सखि कामिनि, किं वृथा मामुपालभसे? दुष्टा विरोधिनी ममोपरि वैरं कृतवती न विधाता। मानुषीवेशविधानव्याजेन कपोलयोर्मसीलेपनं विधाय त्वां दृष्ट्वैव सा पलायिता। जानासि प्रियसखि, यत्तस्या एव वल्लभो विरोधस्वामहरन्न मे भर्त्ता; कथं मम दण्डं विधास्यति वेधाः?

कामिनी। अहो स्पर्द्धा विरोधिन्याः क्व गता सा राक्षसी? अहमेव तां दण्डयामि; किं विधिना?

(इतस्ततः परिक्रामति)

कामिनी। (परावृत्य स्ववस्त्रेण सुधन्याया मुखमसीमुद्धारयन्ती सखेदं) सुधन्ये, जानासि कथमपहृताहं राक्षसैः?

सुधन्या। सखि, न जानामि।

कामिनी। यदि भक्षणाय, किं नाधुनापि भक्षितास्मि।

सुधन्या। अलमलीकाशङ्कया, न वयं मानुषाहाराः।

कामिनी। तर्हि किं विवाहस्य कृते?

सुधन्या। (सस्मितं) सुष्ठु सम्भाव्यते त्वया।

कामिनी। सखि, सत्यं कथयामि—निर्म्मनुष्ये काननेऽस्मिन् एकाकिनी चिरं निवसन्ती विरक्तास्मि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुधन्या। (सपरिहासं) अहो कष्टं, सखि, द्वितीयन्ते सत्वरमन्वेषयामि।

विरोधिन्यादयः। (सहसा प्रविश्य) अहो कष्टं, सखि, द्वितीयन्ते सत्वरमन्वेषयामि। (इत्युक्त्वैव निष्क्रान्ताः)

कामिनी। सखि सुधन्ये, नियतानुबद्धवैरां विरोधिनीमेव साम्प्रतमनुधावामि। (इति द्रुतं निष्क्रान्ता)

सुधन्या। ममाप्येतदभिमतम्। (इति निष्क्रान्ता)

समाप्तश्चतुर्थोऽङ्कः

पञ्चमोऽङ्कः

उत्पलावतकाननैकदेशः

(प्रविशति कश्चिद् गूढ़पुरुषः)

गूढ़पुरुषः। देशकालप्रभेदेन भिन्नं रूपमुपेयिवान्।
गुप्तचारोऽवतारस्य प्राकृतैर्न विबुध्यते॥

अहमस्मि सम्राड़ुत्तमस्य गूढ़पुरुषः। राक्षसगृहीताया ब्राह्मणभार्य्यायाः सम्यगन्वेषणाय रक्षणाय च समागतोऽस्मिन् कानने। (एकां पेटिकां पृष्ठदेशादवतार्य्य)

एते लसन्ति मम राष्ट्ररहस्यभेत्तुः
के के न रूपपरिवर्त्तनहेतुवेशाः।
ज्योतिर्ज्ञजाङ्गलिकभिक्षुभुजङ्गनारी-
सन्न्यासिवानरवपुःकपटाय योग्याः॥

तदधुना कतमं वेशं विरचयामि (इति वेशविचयं नाटयति)। (सभयम्) अये पदशब्दमिव शृणोमि। यावद् वृक्षान्तराले तिष्ठामि। अथवा का भीतिर्यस्य मम वंशीध्वनिमपेक्षमाणः स्वयमेव सम्राट् ससैन्यः काननमेतत् परिवेष्ट्य तिष्ठति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(नेपथ्ये—भो: भो: भो:, क्रो: क्रो: क्रो:, मू: मू: मू: ।) अये कोऽयं शस्त्राहत इव क्रोशन्नित एवाभिगच्छति ? यावदेनं पादपान्तरित: पश्यामि । (इति वृक्षान्तराले गच्छति)

(तत: प्रविशति करेण जालमादाय कश्चिद् राक्षस:)

राक्षस: । भो: भो: भो: क्रो: क्रो: क्रो: मू: मू: मू: ।

भयं लज्जा च मोहश्च त्रयमाक्रामतीव माम् ।
यदज्ञातेन शस्त्रेण ताड़ितोऽहं जड़ीकृत: ॥

न जानामि कस्य शस्त्रसम्पात: पादयोर्मे शक्तिमपहरति । यावदुपविशामि (पदमर्दनं नाटयति) । ह्री ह्री ह्री भो: ! तथापि न मे हास्यं विलीयते तुण्डात् । अहो प्रियसखीनां राक्षसीनाम् अपूर्वेयमुत्सवकल्पना । (आकाशे) अयि विरोधिनि, बलाकिनि सुधन्ये क्षणमपेक्षध्वं यावदन्वेषयामि । किं कथयत—कामिनी नैकाकिनी क्षणमपि स्थातुमिच्छति, तत् त्वर्थ्यतां तस्या: सहचरसंग्रहायेति ? प्रियसख्य:, अयमहं जालमादाय गहनमवगाहे । सज्जीकुरुत यूयं वरसज्जाम् । अहमपि वररूपिणं वानरं गृहीत्वा सत्वरमेव प्रत्यावर्त्तिष्ये । अयमेवाद्यतनो महोत्सवोऽस्माकम् ।

अपूर्वरूपलावण्या कामिनी कन्यका यथा ।
तस्या योग्यतमो नूनं तथा स्याद् वानरो वर: ॥

यावदत्रोपनिहितवानरभक्ष्यस्तिरोहित: समुद्यतजालस्तिष्ठामि । (इति तथा करोति)

गूढ़पुरुष: । अहो लब्धोऽयमवसरो देवताप्रसादात् । यावदात्मनो वानरवेशं विधास्यामि । यतो द्रष्टव्या रक्षितव्या च ब्राह्मणस्य भार्य्या । एष एव कठोरो महाराजनिदेश: । अतश्च—

राक्षसावासनीताया: सीताया हनुमानिव ।
रक्षणार्थं हि कामिन्या विपत्सिन्धौ पताम्यहम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो साम्प्रतं वानरोऽस्मि सम्यक्। यावदस्त्रवस्त्रादिकं रक्षामि वृक्षकोटरे। सङ्केतवंशो कक्षस्थान्तस्तिष्ठतु। अधुना तरुशाखामाश्रयामि। (तथा कृत्वा उकु-उकु-शब्दं करोति)

राक्षसः। अये कश्चिदागतमिव मन्ये ; यावज्जालसंयमनाय सज्जी-भवामि। (ततो भूमिगतं भक्ष्यं ग्रहीतुं वानरः समागच्छति, राक्षसश्च जालमाकर्षति)

गूढ़पुरुषः। (चापल्यातिशयं प्रदर्श्य, उकु, उकु, उकु, शब्दं करोति)

राक्षसः। अरे मा शब्दायस्व, जालबन्धनं ते माल्यबन्धनं घटयिष्यति। (सजालं वानरं गृहीत्वा परिक्रामति)

(ततः प्रविशति श्रीफलं भक्षयन्ती कामिनी, विवाहसज्जा-सम्भृताश्च राक्षस्यः)

(सर्व्वा गायन्ति)—गहने गहने कुसुमविकाशः
कुसुमे कुसुमे सुषमाहासः।
विलसति दिशि दिशि महिमविकाशो
मुखरविहगरवनवमधुमासः।
मुञ्च मुञ्च सखि सम्प्रति मानं स्मर रे स्मरमनुरागनिदानम्।
सफलय मदनं स्वहृदयसदनं दयितो भवतु च तव फलिताशः॥

(ततः प्रविशति कृत्रिमवानरेण सह राक्षसः)

राक्षसः। प्रियसख्यः, धमत शङ्खान्, यावच्च चरणार्पितबन्धनावशेषतामस्य विदधामि, तावद् वरसज्जां कुरुत। (राक्षस्यः कृत्रिमवानरस्य मस्तके मुकुटं गले च माल्यमर्पयन्ति)

सुधन्या। अहो प्रकृतिचपलः कपिरपि भयाद्वा वरवेशलोभाद्वा स्थिरतामापन्नः।

विरोधिनी। नववेशसम्पादितसौभगं वरस्य मुखचन्द्रं पश्यामि। (इति यावदुपसर्पति तावद् विरोधिन्या गण्डं दशति)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरोधिनी। हा धिक्, सुधन्याप्रशंसाफलं मय्येव निपातितं दुष्ट-वानरेण। (मुखमाच्छाद्य सभयं परावर्त्तते)

सुधन्या। (सहासं) अवसरज्ञः खलज्ञश्चायं वानरवरः।

विरोधिनी। कथमिव ?

सुधन्या। स्मरसि मसीलेपनम् ?

विरोधिनी। यद्येवं समाश्वसिहि, न केवलं कामिन्यास्तवापि मनोरथं पूरयिष्यति वरोऽयम्।

सुधन्या। अधुनैव पूरितः।

राक्षसः। अलमतिशयेन। प्रियसख्यः, प्रकृतमनुवर्त्तध्वम्। यावत् कामिनीपार्श्वं वरं नयामः।

(ततः कामिनीपार्श्वमानीय उभयोर्गले माल्यानि क्षिपति)

कामिनी। (माल्यं छित्त्वा) आः भोजनवेलायामेव यावन्तोऽन्त-राया: समापतन्ति।

(सहसा वानरं दृष्ट्वा सर्व्वा अभिद्रुह्यन्ति, वानरश्च कामिन्याः कर्णदेशे किञ्चित् कथनं नाटयति)

सुधन्याः। अहो पश्यत, इदानीमेव कान्तासंलापनैपुण्यं शिक्षितं वानरवरेण।

(सर्व्वा हसन्ति, वानरश्च वंशीध्वनिं करोति)

विरोधिनी। आश्चर्य्यं वानरोऽयं मानुषवद् वंशीं वादयति।

राक्षसः। कुतो लब्धा तावदनेन वंशी ?

सुधन्या। अहो महदिदमाश्चर्य्यम्!

सर्वाः। महदाश्चर्य्यम्!

(नेपथ्ये सहसा भेरीनादेन सह महान् कलकलः, राक्षस्यः सभया निष्क्रान्ताः)

प्रविश्य कश्चित् सैनिकः। (पलायमानं राक्षसं धृत्वा) तिष्ठ, क्व पलायसे भीरो! (राक्षसो वेपते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ततः प्रविशति सम्राट्, बद्धाभ्यां विरोधबलाकाभ्यां सह सेनापतिश्च)

सम्राट्। भो भोः सैनिकाः,

धृतो विरोधः कुणपप्रधानं बलाक एषोऽपि बलाद् गृहीतः।
अलं जिघांसापरितर्पणेन प्रशंसनीया क्व नृशंसता स्यात्॥

तन्मुच्यतामयं राक्षसः।

राक्षसः। महानयं प्रसादः। (इति पादयोर्निपत्य द्रुतं निष्क्रान्तः)

विरोधबलाकौ। सम्राट् प्रभुस्त्वं नरवानराणां
पिशाच-दैतेय-निशाचराणाम्।
अस्मासु कस्ते ननु निग्रहोऽयं
निरागसः किं नृप! दण्डनीयाः?

सम्राट्। यज्ञा ध्वस्ता ब्राह्मणक्षत्रवैश्याः
शूद्रा भद्राद् वञ्चिताश्च प्रकामम्।
सौख्यं हीनं देवतानाञ्च दृष्टा
युष्माभिः किं ज्ञायते नापराधः?॥

हृता भार्या च विप्रस्य कृता दुष्कृतिरुत्कटा।
भुज्यतां तत्फलं सम्यक् स्वकर्म विफलं कुतः?॥

तदधुना तिष्ठत यूयम्। यावद् ब्राह्मणीवार्त्तामवगच्छामि।
कापिकेतो!

गूढ़पुरुषः। महाराज!

सम्राट्! क्वासौ कामिनी नाम ब्राह्मणी।

गूढ़पुरुषः। महाराज, भवदीयप्रभावपरिरक्षितेयमत्र दृश्यताम्।

सम्राट्। अहो स्वस्थोऽहम्। (सैनिकं प्रति) आनीयतां सोऽपि ब्राह्मणः।

सैनिकः। यथाज्ञापयति देवः। (सैनिको निष्क्रान्तः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ततः प्रविशति सैनिकेन ध्रियमाणो ब्राह्मणः)

ब्राह्मणः। (स्वगतं) स्वभावशौचहीनं रक्षःस्थलमागतस्य मे वक्षः-स्थलमतीव वेपते। मन्त्रा अपि विपर्य्ययमाप्नुवन्ति। (प्रकाशं) भोः सैनिक, मुञ्च मुञ्च मां, किं भार्य्यया यदि स्वयं रक्षोमुखे पतेयम्। शास्त्रञ्च श्रूयतां—

'आत्मानं सततं रक्षेद्दारैरपि धनैरपि।'

सैनिकः। ब्राह्मण, अलं भीत्या, पुरत एव देवो दृश्यताम्।

ब्राह्मणः। (उपसृत्य) महाराज, चिराद्दृष्टोऽसि। प्राणरूपेण भवता वियुक्तस्य यन्मे दुर्दैवविलसितं तद्देवा एव जानन्ति।

सम्राट्। ब्रह्मन्, गृह्यतामियं ते भार्य्या।

ब्राह्मणः। स्वस्ति भवते।

कामिनी। हा तात, हा मातः, किं मां न स्मरन्ति भवन्तः। नाहमेतस्य ब्राह्मणस्य गृहे गच्छामि।

ब्राह्मणः। (स्वगतं) कथमद्यापि तथैव वाक्पारुष्यम्! (प्रकाशं) आः पापे, यदि राक्षसैरद्यापि न भक्षितासि, तेषामेव कञ्चिद्वरयस्व भर्त्तृत्वेन। देव, यथावत्कृत्यमनुष्ठितम्। अनुरुद्धो धर्म्मः, तदागच्छतु देवः। राक्षसि, तिष्ठात्रैव। महाराज, तदलमत्रावस्थानेन, यथागतमेव प्रस्थास्यामहे।

कामिनी। आः भोजनप्रतिबन्धो दूरीभवतु। (इति निष्क्रान्ता)

विरोधबलाकौ। ब्राह्मण, न वयं मानुषभक्षकाः, न वा परकामिनीलोलुपा राक्षसाः, येनैवं देवस्य पुरतो भाषसे।

सम्राट्। राक्षसौ, विस्मितोऽस्मि युष्मद्वचनश्रवणेन। यदि नेयमुभयथापि भोग्या युष्माभिस्तत्किमियमपहृता ?

राक्षसौ। देव, ब्राह्मणस्य मन्त्रा एव तत्र निदानम्।

सम्राट्। कथमिव ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राक्षसौ। यज्वनो ब्राह्मणस्यास्योच्चाटनादिमन्त्रैरुद्वेजिता गत्यन्तर-मलभमाना वयं तथानुष्ठितवन्तो यज्ञप्रतिबन्धाय।

सम्राट्। तद् यूयमेव कृतापराधा दण्डनीयाः। ब्राह्मणस्तावदन-पराध एव, यतो निरन्तराययज्ञानुष्ठानं द्विजातिधर्म्म इति।

राक्षसौ। विधातृविहिता वृत्तिरस्माकमपि तादृशी।
निर्दोषा वा सदोषा वा न तयागस्कृतो वयम्॥

सम्राट्। (क्षणं चिन्तयित्वा) श्रूयतामत्र समाधानम्।

बाह्याभ्यन्तरशुद्धानां धर्म्मश्रद्धावतां नृणाम्।
न यज्ञविघ्नं कर्त्तास्थः कुरुतान्यत्र विप्लवम्॥

एवं स्थिते ब्राह्मणेनापि नोच्चाटनमन्त्राः पठिष्यन्ते नापि युष्माकं वृत्तिरोधः।

राक्षसौ। देवस्य निदेशं सर्वथा शिरसा वहामः।

सम्राट्। हृष्टोऽस्मि वः शिष्टाचारेण। एतत्तु पृच्छामि कथं राक्षस इति युष्माकमभिधानम्?

राक्षसौ। महाराज, मनुष्याणां कर्म्मफलभक्षका वयमिति राक्ष-साख्यां प्राप्नुमः।

सम्राट्। एवञ्चेद् ब्राह्मणभार्य्यांया दुष्कर्म्मफले रूपशीले भक्ष्य-तम्। सेनापते, मुच्येतामितौ।

राक्षसौ। यथाज्ञापयति महाराजः।

ब्राह्मणः। सेनापते, क्षणमपेक्षस्व यावदात्मरक्षायै सज्जीभवामि। उक्तञ्च—'न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्'।

(मन्त्रजपं नाटयति)

सम्राट्। विप्रवर, त्रासेनालम्। सेनापते, मुच्यतामितौ। (सेनापति-स्तथा करोति, राक्षसौ निष्क्रम्य पुनः प्रविशतः परिवर्त्तित-रूपया कामिन्या सह)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामिनी। (ब्राह्मणमुपसृत्य) नाथ, क्षम्यन्तां मे मूढ़ाया अपराधाः। गृह्णातु मां हतभागधेयाम्। (इति पादयोः पतति)

ब्राह्मणः। केयम्? स्वरसंयोगेन जानामि—कामिनीति। कामिनि, कामिनि—

कामिनी। एषास्मि क्षमार्हा दासी।

ब्राह्मणः। अहो विपर्य्यासः। विरोध, बलाक, चिरमित्रताबद्धोऽस्मि।

(प्रविश्य राक्षस्यः उभयोः करयोजनं कुर्वन्ति गायन्ति च मुञ्च मुञ्च सखि सम्प्रति मानमित्यादि। गूढ़पुरुषश्च नृत्यति)

सम्राट्। ब्रह्मन्, किमतःपरमपि भवतः प्रियमाचरामि?

ब्राह्मणः। राजन्, किमतःपरमपि प्रियमस्ति? तथापीदमस्तु—

सन्तु स्त्रियः स्वामिमनोऽनुकूला लसन्तु धर्म्मा विधिबोधमूलाः।
वसन्तु विद्या नृषु धर्म्मप्रवेशा हसन्तु धर्म्मैकधनाश्च देशाः॥

इति पञ्चमोऽङ्कः

समाप्तं भट्टसङ्कटम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar